डॉ॰ अपर्णा कुमारी
सहायक प्राध्यापिका
(गेस्ट फैकल्टी)
आर॰ डी॰ एस॰ कॉ॰ मुज॰
संस्कृत विभाग

B.A (Hons)
Part II
Paper IV

## मृच्छकटिकम्

श्लोक व्याख्या —

2. पातु वो नीलकण्ठस्य कण्ठः श्यामाम्बुदोपमः ।
गौरीभुजलता यत्र विद्युल्लेखेव राजते ॥2॥

अन्वय → नीलकण्ठस्य, श्यामाम्बुदोपमः [सः] कण्ठः, वः पातु, यत्र, गौरीभुजलता, विद्युल्लेखा इव राजते ।

व्याख्या – नीलकण्ठस्य = नीलः = नीलवर्णः = श्यामवर्णः, कण्ठः = गलप्रदेशो यस्य सः, तस्य शङ्करस्येत्यर्थः, श्यामाम्बुदोपमः = श्यामश्चासावम्बुदश्चेति श्यामाम्बुदः = नीलजलदः, तेन उपमा = सादृश्यं यस्य सः, [सः = पुराणादिकथासु प्रसिद्धः] कण्ठः = गलप्रदेशः, तादृशकण्ठवान् इति भावः, वः = युष्मान् दर्शकान् सामाजिकान् इत्यर्थः, पातु = रक्षतु; यत्र = यस्मिन् कण्ठे, गौरीभुजलता = गौर्याः = गौरवर्णवत्याः पार्वत्याः, भुजः = लता इव, पुरुषव्याघ्र इव समासः, अथवा भुजः = बाहुः एव लता = वल्ली, अत्र कण्ठाश्लेषे वेष्टन् धर्मसाम्यात् भुजे लतात्वधर्मस्य आरोपो बोध्यः,
विद्युल्लेखा = विद्युतः = तडितः लेखा = रेखा, पंक्तिः, इव यथा राजते = शोभते । यथा नीलमेघमध्ये विराजमानायाः विद्युल्लेखायाः शोभा दृश्यते तथैव नीलवर्णस्य भगवतः शङ्करस्य कण्ठे स्वयंग्राहितायाः गौर्याः बाहोः शोभा वर्तते इति भावः ।

अतः उपमालंकारः, पथ्यावक्त्रं छन्दम् अत्र ।

अर्थ → [समुद्रमन्थन से निकले हुए विष का पान करने से] नील वर्ण के कण्ठ वाले भगवान शङ्कर का श्याम = नीले बादल के समान [वह पुराणादि ग्रंथों में अति प्रसिद्ध] कण्ठ [अर्थात् कण्ठवाले शिव] आप सभी दर्शकों की रक्षा करें, जिस कण्ठ में गौरी = गौरवर्णवाली पार्वती की लतातुल्य भुजायें बिजली की पंक्ति के समान शोभित हो रही हैं ।